॥ श्रीबदरीनाथायनमः ॥

श्रीबदरिकाश्रममाहात्म्यारम्भः

प्रथमोऽध्यायः

बदरिकाश्रमस्यसर्वतीर्थाधिकत्ववर्णनम्

शौनक उवाच

सूतसूतमहाभाग! सर्वधर्मविदाम्बर !। सर्वशास्त्रार्थतत्त्वज्ञ! पुराणे परिनिष्ठित !॥ १॥
व्यासःसत्यवतीपुत्रोभगवान्विष्णुरव्ययः। तस्ययत्प्रियशिष्यस्त्वंत्वत्तोवेत्तानकश्चन
प्राप्ते कलियुगे घोरे सर्वधर्मबहिष्कृते। जना वै दुष्टकर्माणः सर्वधर्मविवर्जिताः॥
क्षुद्रायुषः क्षुद्रप्राणबलवीर्यतपः क्रियाः। अधर्मनिरताः सर्वे वेदशास्त्रविवर्जिताः॥
तीर्थाटनतपोदानहरिभक्तिविवर्जिताः। कथमेषामल्पकानामुद्धारोऽल्पप्रयत्नतः॥ ५॥
तीर्थानामुत्तमं तीर्थं क्षेत्राणामुत्तमं तथा। मुमुक्षूणां कुतः सिद्धिःकुत्रवाऽऽपिसञ्चयः
कुत्रवाऽल्पप्रयत्नेन तपोमन्त्राश्च सिद्धिदाः। कुत्र वा वसतिश्रीमाञ्जगतामीश्वरेश्वरः

भक्तानामनुरक्तानामनुग्रहकृपालयः ॥ ७ ॥

एतदन्यच्च सर्वं मे परार्थैकप्रयोजनम् । ब्रूहि भद्राय लोकानामनुग्रहविचक्षण !॥ ८ ॥

सूत उवाच

साधुसाधुमहाभाग! भवान्परहिते रतः । हरिभक्तिकृतासक्तिप्रक्षालितमनोमलः ॥९॥

अथ मे देवकीपुत्रो हृत्पद्ममधिरोहति । प्रसङ्गात्तव विप्रर्षे! दुर्ल्लभः साधुसङ्गमः॥१०

हरति दुष्कृतसञ्चयमुत्तमां गतिमलं तनुते तनुमानिनाम् ।

अधिकपुण्यवशादवशात्मनां जगति दुर्लभसाधुसमागमः ॥ ११ ॥

हरति हृदयबन्धं कर्मपाशार्दितानां वितरति पदमुच्चैरल्पजल्पैकभाजाम् ।

जननमरणकर्मश्रान्तविश्रान्तिहेतुस्त्रिजगति मनुजानां दुर्ल्लभः सत्प्रसङ्गः॥

सूत उवाच

अयंप्रश्नःपुरासाधो!स्कन्देनाऽकारिसर्वतः । कैलाशशिखरेरम्यऋषीणांपरिशृण्वताम्

पुरतो गिरिजाभर्तुः कर्तुं निःश्रेयसं सताम् ॥ १३ ॥

स्कन्द उवाच

भगवन्सर्वलोकानांकर्त्ता हर्त्ता पिता गुरुः। क्षेमाय सर्वजन्तूनां तपसेकृतनिश्चयः ॥

कलिकाले ह्यनुप्राप्ते वेदशास्त्रविवर्जिते । कुत्र वा वसतिश्रीमान्भगवान्सात्वतांपतिः

क्षेत्राणि कानि पुण्याणि तीर्थानिसरितस्तथा । केनवाप्राप्यतेसाक्षाद्भगवान्मधुसूदनः

श्रद्दधानाय भगवन्कृपया वद मे पितः !॥ १६ ॥

श्रीमहादेव उवाच

बहूनि सन्ति तीर्थाणिक्षेत्राणि च षडानन !। हरिवासनिवासैकपराणि परमार्थिनाम्

काम्यानि कानिचित्सन्ति कानिचिन्मुक्तिदान्यपि ।

इहाऽमुत्रार्थदान्येव बहुपुण्यप्रदानि वै ॥ १८ ॥

गङ्गा गोदावरीरेवातपतीयमुनासरित् । क्षिप्रा सरस्वतीपुण्या गौतमीकौशिकीतथा

कावेरी ताम्रपर्णी च चन्द्रभागा महेन्द्रजा । चित्रोत्पला वेत्रवती सरयूःपुण्यवाहिनी

चर्मण्वती शतद्रूश्च पयस्विन्यत्रिसम्भवा ।

गण्डिका बाहुदा सर्वाः पुण्याः सिन्धुः सरस्वती ॥ २० ॥

भुक्तिमुक्तिप्रदाश्चैताः सेव्यमाना मुहुर्मुहुः ।

अयोध्याद्वारिका काशी मथुराऽवन्तिका तथा ॥ २१ ॥

कुरुक्षेत्रं रामतीर्थं काञ्ची च पुरुषोत्तमम् । पुष्करं दर्दुरं क्षेत्रं वाराहं विधिनिर्मितम् ॥

बदर्य्याख्यं महापुण्यं क्षेत्रं सर्वार्थसाधनम् ॥ २३ ॥

अयोध्यां विधिवद्दृष्ट्वा पुरीं मुक्त्येकसाधनीम् ।

सर्वपापविनिर्मुक्ताः प्रयान्ति हरिमन्दिरम् ॥ २४ ॥

विविधविष्णुनिषेवणपूर्वकाचरितपूजननर्तनकीर्तनाः ।

गृहमपास्य हरेरनुचिन्तनाज्जितगृहाजितमृत्युपराक्रमाः ॥ २५ ॥

स्वर्गद्वारे नरः स्नात्वा दृष्ट्वा रामालयं शुचिः । न तस्यकृत्यंपश्यामिकृतकृत्योभवेद्यतः

द्वारिकायां हरिःसाक्षात्स्वालयं नैव मुञ्चति । अद्यापिभवनंकैश्चित्पुण्यवद्भिःप्रदृश्यते

गोमत्यां तु नरः स्नात्वा दृष्ट्वा कृष्ण मुखाम्बुजम् ।

मुक्तिःप्रजायते पुंसो विना साङ्ख्यं षडानन !॥ २८ ॥

असीवरुणयोर्मध्ये पञ्चक्रोश्यां महाफलम् । अमरा मृत्युमिच्छन्तिकाकथाइतरेजनाः

मणिकर्ण्यां ज्ञानवाप्यांविष्णुपादोदकेतथा । ह्रदे पञ्चनदेस्नात्वानमातुः स्तनपोभवेत्

प्रसङ्गेनापि विश्वेशं दृष्ट्वा काश्यांषडानन !। मुक्तिःप्रजायतेपुंसांजन्ममृत्युविवर्जिता

बहुना किमिहोक्तेन नैतत्क्षेत्रसमं क्वचित् । तपोपवासनिरतो मथुरायां षडानन !

जन्मस्थानं समासाद्य सर्वपापैः प्रमुच्यते ॥ ३२ ॥

विश्रान्तितीर्थे विधिवत्स्नात्वा कृत्वा तिलोदकम् ।

पितॄनुद्धृत्य नरकाद्विष्णुलोकं प्रगच्छति ॥ ३३ ॥

यदि कुर्यात्प्रमादेनपातकं तत्र मानवः । विश्रान्तेस्नानमासाद्यभस्मीभवतितत्क्षणात्

अवन्त्यां विधिवत्स्नात्वाशिप्रायांमाधवेनराः । पिशाचत्वंनपश्यन्तिजन्मातरशतैरपि

कोटितीर्थे नरःस्नात्वाभोजयित्वाद्विजोत्तमान् । महाकालं हरंदृष्ट्वासर्वपापैःप्रमुच्यते

मुक्तिक्षेत्रमिदं साक्षान्मम लोकैकसाधनम् । दानाद्दरिद्रताहानिरिहलोके परत्र च ॥

कुरुक्षेत्रे रामतीर्थे स्वर्णं दत्त्वा स्वशक्तितः ।

सूर्योपरागे विधिवत्स नरो मुक्तिभाग्भवेत् ॥ ३८ ॥

ये तत्र प्रतिगृह्णन्ति नरा लोभवशङ्गताः । पुरुषत्वं न तेषां वै कल्पकोटिशतैरपि ॥

हरिक्षेत्रे हरिं दृष्ट्वा स्नात्वा पादोदके जनः । सर्वपापविनिर्मुक्तो हरिणा सह मोदते ॥

खगगणा विविधा निवसन्त्यहो ऋषिगणाः फलमूलदलाशनाः ।

पवनसंयमनक्रमनिर्जितेन्द्रियपराक्रमणा मुनयस्त्विह ॥ ४१ ॥

विष्णुकाञ्च्यां हरिः साक्षाच्छिवकाञ्च्यां शिवः स्वयम् ।

अभेदादुभयोर्भक्त्या मुक्तिः करतले स्थिता ।

विभेदजननात्पुंसां जायते कुत्सिता गतिः ॥ ४२ ॥

सकृद्दृष्ट्वा जगन्नाथं मार्कण्डेयह्रदे प्लुतः । विनाज्ञानेन योगेन न मातुः स्तनपो भवेत्

रोहिण्यामुदधौ स्नात्वा इन्द्रद्युम्नह्रदे तथा । भुक्त्वा निवेदितं विष्णो वैकुण्ठे वसतिं लभेत्

दशयोजनविस्तीर्णं क्षेत्रं शङ्खोपरि स्थितम् । चतुर्भुजत्वमायान्ति कीटा अपि न संशयः

कार्त्तिक्यां पुष्करे स्नात्वा श्राद्धं कृत्वा सदक्षिणम् ।

भोजयित्वा द्विजान्भक्त्या ब्रह्मलोके महीयते ॥ ४६ ॥

सकृत्स्नात्वा ह्रदे तस्मिन्यूपं दृष्ट्वा समाहितः । सर्वपापविनिर्मुक्तो जायते द्विजसत्तमः

षष्टिवर्ष सहस्राणि योगाभ्यासेन यत्फलम् ।

सौकरे विधिवत्स्नात्वा पूजयित्वा हरिं शुचिः ॥ ४८ ॥

सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति । तीर्थराजं महापुण्यं सर्वतीर्थनिषेवितम् ॥

कामिनां सर्वजन्तूनामीप्सितं कर्मभिर्भवेत् ।

वेण्यां स्नात्वा शुचिर्भूत्वा कृत्वा माधवदर्शनम् ।

भुक्त्वा पुण्यवतां भोगानन्ते माधवतां व्रजेत् ॥ ५० ॥

माघे मासि नरः स्नात्वा त्रिवेण्यां भक्तिभावितः ।

बदरीकीर्तनात्पुण्यं तत्समाप्नोति मानवः ॥ ५१ ॥

दशाश्वमेधिकं तीर्थं दशयज्ञफलप्रदम् । संक्षेपात्कथितं पुत्र! किं भूयः श्रोतुमिच्छसि

स्कन्द उवाच

बदर्य्याख्यं हरेः क्षेत्रं त्रिषु लोकेषु दुर्लभम् । क्षेत्रस्य स्मरणादेव महापातकिनो नराः

विमुक्तकिल्बिषाः सद्यो मरणान्मुक्तिभागिनः ॥ ५३ ॥

अन्यतीर्थे कृतं येन तपः परमदारुणम् । तत्समा बदरीयात्रा मनसाऽपि प्रजायते ॥

बहूनि सन्ति तीर्थानि दिवि भूमौ रसातले । बदरीसदृशं तीर्थं न भूतं न भविष्यति

अब्दायुसहस्राणि वायुभोज्ये च यत्फलम् । क्षेत्रान्तरे विशालायां तत्फलं क्षणमात्रतः

कृते मुक्तिप्रदा प्रोक्ता त्रेतायां योगसिद्धिदा ।

विशाला द्वापरे प्रोक्ता कलौ बदरिकाश्रमः ॥ ५७ ॥

स्थूलसूक्ष्मशरीरं तु जीवस्य वसतिस्थलम् । तद्विनाशयति ज्ञानाद्विशाला तेन कथ्यते

अमृतं स्रवते या हि बदरीतरुयोगतः । बदरी कथ्यते प्राज्ञैर्ऋषीणां यत्र सञ्चयः ॥

त्यजेत्सर्वाणि तीर्थानि काले काले युगे युगे ।

बदरीं भगवान्विष्णुर्न मुञ्चति कदाचन ॥ ६० ॥

सर्वतीर्थावगाहेन तपोयोगसमाधितः । तत्फलं प्राप्यते सम्यग्बदरीदर्शनाद् गुह! ॥ ६१

षष्टिवर्षसहस्राणि योगाभ्यासेन यत्फलम् । वाराणस्यां दिनैकेन तत्फलं बदरीगतौ

तीर्थानां वसतिर्यत्र देवानां वसतिस्तथा । ऋषीणां वसतिर्यत्र विशाला तेन कथ्यते

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे
बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसम्वादे बदरिकाश्रमस्य
सर्वतीर्थाधिकत्वर्णनं नाम प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः

अग्निकृतभगवत्स्तववर्णनम्

स्कन्द उवाच

कथमेतत्समुत्पन्नं कैर्वा क्षेत्रं निषेवितम् । कोवातस्याऽप्यधीशःस्यादेतद्विस्तरतोवद

शिव उवाच

अनादिसिद्धमेतत्तु यथा वेदा हरेस्तनूः । अधिष्ठाता हरिः साक्षान्नारदाद्यैर्निषेवितम्
पुराकृतयुगस्याऽऽदौ स्वीयां दुहितरं विधिः । रूपयौवनसम्पन्नांसतांयमितुमुद्यतः
तं दृष्ट्वा तादृशं रोषाच्छिरः खड्गेन पञ्चधा । चिच्छेदाऽहं कपालं तद्ब्रह्महत्यासमुद्यते
हस्तेकृत्वा जगामाऽऽशुतत्रतीर्थानिसेवितुम् । दिवि भूमौ चपातालेतपश्चरणपूर्वकम्
न गता ब्रह्महत्या मे कपालं तादृशं करे । तदा वैकुण्ठमगमं द्रष्टुं लक्ष्मीपतिं हरिम्
विनयावनतो भूत्वा नमस्कृत्य पुनः पुनः । सर्वमाख्यातवांस्तस्मैव्यसनं करुणात्मने
तस्योपदिष्टमादाय बदरीं समुपागतः । तत्क्षणाद्ब्रह्महत्या मे वेपमाना मुहुर्मुहुः ॥८॥
अन्तर्हितं कपालं तत्कराद्विगलितं मम । ततः प्रभृति तत्क्षेत्रं पार्वत्या सह सादरम्॥

तिष्ठामि तपआस्थाय ऋषीणां प्रीतिमावहन् ।
वाराणस्यां यथा प्रीतिः श्रीशैलशिखरे तथा ॥ १० ॥
कैलाशे शिवया सार्द्धं ततोऽनन्तगुणाधिका ।
अन्यत्रम रणान्मुक्तिः स्वधर्मविधिपूर्वकात् ॥ ११ ॥
बदरीदर्शनादेव मुक्तिः पुंसां करे स्थिता ।
हरेश्चरणसान्निध्यं यत्र वैश्वानरः स्वयम् ॥ १२ ॥

तत्रकेदाररूपेण मम लिङ्गं प्रतिष्ठितम् । केदारदर्शनात्स्पर्शादर्चनाद्भक्तिभावतः ॥
कोटिजन्मकृतं पापं भस्मीभवति तत्क्षणात् । कलामात्रेण तिष्ठामितत्रक्षेत्रेविशेषतः

कला पञ्चदशैवाऽत्र मूर्तिमध्ये ह्यवस्थितम् ॥ १५ ॥

जितकृतान्तभयाः शिवयोगिनः कृतमृगाजिनकृत्तिसुवाससः ।
वरविभूतिजटान्वितभूषणाः स्वयमुपासत एव जटाधरम् ॥ १६ ॥
फलदलाम्बुसमीरणतोषिताः शिवमनोजितमृत्युपरिश्रमाः ।
गिरिवरस्थितनिर्जितमानसाः प्रसरनिर्म्मलबुद्धिमहोदयाः ॥ १७ ॥
कमलकोमलकान्तिमुखाम्बुजाः शिवकृपाजितनिर्भरवैरिणः ।
करधृताञ्जलिमौलिशिवेक्षणाः शिवमुपासत एव निशामुखे ॥ १८
करधृतजपमालाः शान्तिसन्तोषभाजः कृतनतिपरनित्यप्रार्थनाश्चन्द्रमौलौ
हरचरणसरोजध्यानविज्ञानमूर्तिव्यथितजनमनोजाः सर्वभावान्वितान्तम् ॥

वाराणस्यां मृतानां च तारकं ब्रह्मसञ्ज्ञकम् । जनानां पूजनात्तत्र ममलिङ्गस्य जायते
वह्नितीर्थं परिभ्राजद्भगवच्चरणान्तिके । केदाराख्यं महालिङ्गं दृष्ट्वा नो जन्मभाग्भवेत्

स्कन्द उवाच

कथं वैश्वानरः श्रीमान्सर्वलोकैककारणम् । बदरीमनुसन्तस्थौ तन्मे वद महामते ॥

शिव उवाच

पुरा समाजः समभूदृषीणामूर्ध्वरेतसाम् । गङ्गा भगवती यत्र कालिन्द्या सह सङ्गता
दशाश्वमेधिकं नाम तीर्थं त्रैलोक्यविश्रुतम् । बभूव तत्र भगवान्हुतभुक्प्रश्रयानतः

ऋषीणामग्रतः स्थित्वा प्रष्टुं समुपचक्रमे ॥ २४ ॥

वैश्वानर उवाच

दृष्ट्वा दृष्टे कद्वग्ज्ञाना भवन्तो ब्रह्मवित्तमाः । दीनार्थे करुणापूर्णा हृदयार्द्रा दयालवः ॥

सर्वदुर्भक्षणोद्भूतपातकालिप्तचेतसः ।
कथं स्यान्निरयान्मुक्तिर्मम ब्रह्मविदुत्तमाः ॥ २६ ॥

सर्वेषामृषिवर्याणामाजगाम मुनीश्वरः । गङ्गाऽम्भसि समाप्लुत्यवाक्यंचेदमुवाच ह

व्यास उवाच

अस्त्येकः परमोपायो भवतः पापनिष्कृतौ । सर्वभक्षाख्यदोषस्य बदरीं शरणं श्रय
यत्राऽऽस्ते भगवान्साक्षाद्देवदेवो जनार्द्दनः । भक्तानामप्यभक्तानामघहा मधुसूदनः

तत्र गङ्गाऽम्भसि स्नात्वाकृत्वा प्रदक्षिणांहरेः । दण्डवत्प्रणिपातेनसर्वपापक्षयो भवेत्
ततोव्यासमुखाच्छ्रुत्वा ऋषीणामनुवादतः । उत्तराभिमुखो वह्निर्गन्धमादनमाययौ
ततो बदरिकां प्राप्य स्नात्वा गङ्गाम्भसि स्वयम् ।
नारायणश्रमं गत्वा नत्वा प्रोवाच भक्तिमान् ॥ ३२ ॥

अग्निरुवाच

विशुद्धविज्ञानघनं पुराणं सनातनं विश्वसृजां पतिं गुरुम् ।
अनेकमेकं जगदेकनाथं नमाम्यनन्ताश्रितशुद्धबुद्धिम् ॥ ३३ ॥
मायामयीं शक्तिमुपेत्य विश्वकर्त्तारमुद्दिश्य रजोपयुक्तम् ।
सत्त्वेन चाऽस्य स्थितिहेतुमुग्रमथो तमोभिर्ग्रसितारमीडे ॥ ३४ ॥
अविद्यया विश्वविमोहिताऽऽत्मा विद्यैकरूपं विततं त्रिलोक्याम् ।
विद्याश्रितत्वात्सकलज्ञमीशं त्वविद्यया जीवमहं प्रपद्ये ॥ ३५ ॥
भक्तेच्छयाऽऽविष्कृतदेहयोगमाभोगभोगार्पितयोगयोगम् ।
कौशेयपीताम्बरजुष्टशक्तिं विचित्रशक्त्यग्रमयैर्मीडे ॥ ३६ ॥
अथ प्रसन्नो भगवांस्तुतः सर्वैर्हृदिस्थितः ।
प्रोवाच मधुरं वाक्यं पावकं पावनार्थिनम् ॥ ३७ ॥

श्रीनारायण उवाच

वरं वरय भद्रन्ते वरदोऽहमुपागतः । स्तवेनाऽनेन तुष्टोऽस्मि विनयेन तवाऽनघ !॥

अग्निरुवाच

ज्ञातं भगवता सर्वं यदर्थमहमागतः । तथाऽपि कथयाम्येतदीश्वराज्ञानुपालनम् ॥ ३६
सर्वभक्षो भवाम्येव निष्कृतिस्तु कथम्भवेत् । अत्यन्तभयसम्पत्ति रेतस्माज्जायतेमम

श्रीनारायण उवाच

क्षेत्रदर्शनमात्रेण प्राणिनां नास्तिपातकम् । मत्प्रसादात्पातकंतुत्वयिमाऽस्तुकदाचन
ततः प्रभृति भूतात्मा पावकः सर्वतो भृशम् ।
कलयाऽवस्थितश्चाऽत्र सर्वदोषविवर्जितः ॥ ४२ ॥

य एतत्प्रातरुत्थायश्रृणोति श्रावयेच्छुचिः । अग्नितीर्थकृतस्नानंफलम्प्राप्नोत्यसंशयम्
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे
श्रीबदरिकाश्रममाहात्म्येऽग्निकृतभगवत्स्तुतिवर्णनं नाम
द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः

अग्नितीर्थनारदशिलामार्कण्डेयशिलामाहात्म्यवर्णनम्

स्कन्द उवाच

भगवन्सर्वभूतेषु सर्वधर्मविशारद ! । अग्नितीर्थस्य माहात्म्यं कृपया वद मे पितः !॥

शिव उवाच

अतिगुह्यतमं तीर्थं सर्वतीर्थनिषेवितम् । संक्षेपात्कथयाम्येतत्त्वाऽऽदरवशादहम् ॥२
महापातकिनोयेचअतिपातकिनस्तथा । स्नानमात्रेण शुद्ध्यन्तिविनाऽऽयासेन पुत्रक!
प्रायश्चित्तेनयत्पापंनगच्छेन्मरणान्तिकम् । स्नानमात्रेणतीर्थस्यपावकस्यविशुद्ध्यति
अत्यन्तमलसम्बद्धं यथाशुद्ध्यति हाटकम् । तथाग्नितीर्थमासाद्यदेहीपापैर्विशुद्ध्यति
कुशाग्रेणोदबिन्दुं च पीत्वा वर्षत्रयं नरः । अन्यक्षेत्रे तपः कृत्वा तदत्र स्नानमात्रतः
ब्राह्मणान्भोजयित्वाऽस्मिन्यथाविभवसम्भवैः । दरिद्रताकुलेतेषांनकदाचित्प्रजायते
उपवासेन यः प्राणान्वह्नितीर्थे त्यजेन्नरः । स भित्त्वासूर्यलोकादीन्विष्णुलोकंप्रपद्यते
चान्द्रायणसहस्रैस्तु कृच्छ्रैःकोटिभिरेवच । यत्फलंलभतेमर्त्यस्तत्स्नानाद्वह्नितीर्थतः
पञ्चधा ये प्रकुर्वन्ति पापमस्मिन्षडानन !। जपेन पवनायामैर्विशुद्धिरिति मे मतिः ॥
ज्ञानेन मोहवशतः पापं कुर्वन्ति येऽधमाः । पैशाचीं योनिमायान्ति यावदिन्द्राश्चतुर्दश
अनाश्रमी चाश्रमी वा यावद्देहस्य धारणम् । न तीर्थे पावकेकुर्यात्पातकंबुद्धिपूर्वकम्
स्नानं दानं जपो होमः सन्ध्या देवार्चनं तथा ।

अत्राऽनन्तगुणं प्रोक्तमन्यतीर्थात्षडानन !॥ १३ ॥
बहूनि सन्ति तीर्थानि पावनानि महान्त्यपि । वह्नितीर्थसमं तीर्थं नभूतंनभविष्यति
न ब्रह्मा न शिवःशेषोन देवानचतापसाः । शक्नुवन्ति फलं नाऽलंवक्तुंपावकतीर्थजम्
किं तेषां बहुभिर्यज्ञैःकिं दानैर्नियमैर्यमैः । येषांपावकतीर्थेऽस्मिन्स्नानंदशदिनम्भवेत्
उपवासेन यः प्राणान्वह्नितीर्थे जयेन्नरः ।
उपवासत्रयं कृत्वा पूजयित्वा जनार्दनम् ।
नरः पावकतीर्थेऽस्मिन् स भवेत्पावकोपमः ॥ १७ ॥
शिलापञ्चकमध्यस्थं सान्निध्यं नित्यता हरेः । तत्रैव पावकं तीर्थं सर्वपापप्रणाशनम्

स्कन्द उवाच

कथंतत्र शिलाःपञ्च केन वा तत्र निर्मिताः । किंपुण्यंकिंफलंतासांवक्तुमर्हस्यशेषतः?

शिव उवाच

नारदी नारसिंही च वाराही गारुडी तथा ।
मार्कण्डेयीति विख्याताः शिलाः सर्वार्थसिद्धिदाः ॥२० ॥
नारदो भगवांस्तेपे तपः परमदारुणम् । दर्शनार्थं महाविष्णोःशिलायांवायुभोजनः
षष्टिवर्षसहस्राणिशिलायांवृक्षवृत्तिमान् । तदाऽसौभगवान्विष्णुस्तत्रब्राह्मणरूपधृक्
जगाम पुरतस्तस्य कृपया मुनिसत्तमम् । उवाच वचनं चारु किमिति क्लिश्यते ह्यपि
किं वा तवेप्सितं ब्रूहि तपसा क्षीणकल्मष !॥

नारद उवाच

को भवान्विजनेऽरण्ये ममानुग्रहतत्परः । मनःप्रसन्नतामेति दर्शनात्ते द्विजोत्तम !॥२४
इत्युक्तो नारदेनाऽसौ शङ्खचक्रगदाधरः । पीताम्बरलसत्पद्मवनमालाविभूषणः ॥२५
श्रीवत्सकौस्तुभभ्राजत्कमलाविमलालयः ।
सुनन्दनप्रमुख्यैः स स्तूयमानो जनार्द्दनः ॥ २६ ॥
दर्शयामास रूपं स्वं नारदाय कृपार्दितः । तं दृष्ट्वा सहसोत्थाय तनुं प्राण इवाऽऽगतः
कृताञ्जलिपुटो भूत्वा नमस्कृत्य पुनः पुनः । तुष्टाव प्रणतो भूत्वा जगतामीश्वरेश्वरम्

नारद उवाच

यः सर्वसाक्षी जगतामधीश्वरो भक्तेच्छया जातशरीरसम्पदः ।
कृपामहाम्भोनिधिराश्रितानां प्रसीदतां पावनदिव्यमूर्तिः ॥ २९ ॥
हिताय लोकस्य सतां पुनर्मनः सुतोषणायाऽचिरमुत्कलादिभिः ।
प्रसन्नलीलाहसितावलोकनः प्रसीदतां सत्त्वनिकायमूर्तिमान् ॥ ३० ॥
कन्दर्पलावण्यविलाससुन्दरः प्रसन्नगम्भीरगिरेन्दिरोत्सवः ।
स्वमाश्रितानां वरकल्पपादपः प्रसीदतां दीनदयार्द्रमानसः ॥ ३१ ॥
यदङ्घ्रिपद्मार्चननिर्मलान्तरा ज्ञानासिना शातितबन्धहेतवः ।
विन्दन्ति यद्ब्रह्मसुखं गतक्रमाः प्रसीदतां दीनदयार्द्र मानसः ॥ ३२ ॥
संसारवाराब्धिविबद्धसेतुर्यः सृष्टिपालान्तविधानहेतुः ।
उपान्तनामा गुणलब्धमूर्तिः प्रसीदतां ब्रह्मसुखानुभूतिः ॥ ३३ ॥
य इन्द्रियाधिष्ठितभूतसूक्ष्माह्निकासहेतुर्द्युतिमद्वरिष्ठः ।
जीवात्मतां गच्छति मायया स्वया स एक ईशो भगवन्प्रसीदताम् ॥ ३४ ॥
स्वदृग्गुणैर्येन विलिप्यते महान्गुणाश्रयं येन च पाञ्चभौतिकम् ।
एकोऽपि नानागुणसम्प्रयुक्तः प्रसीदतां दीनदयालुवर्यः ॥ ३५ ॥
यस्याऽनुवर्तिनो देवा विपदां पदमम्बुधिम् ।
कृत्वा वत्सपदं स्वर्गे निरातङ्का वसन्ति हि ॥ ३६ ॥
नमस्ते वासुदेवाय नमः सङ्कर्षणाय च । प्रद्युम्नायाऽनिरुद्धाय सर्वभूतात्मने नमः ३७
अद्य मे जीवितं धन्यमद्य मे सफलं तपः । अद्य मे सफलं ज्ञानं दर्शनात्ते जनार्दन !॥

श्रीभगवानुवाच

तुष्टोऽहं तपसाऽनेन स्तोत्रेणतव नारद !। त्वत्तोभक्तो न मे कश्चित्त्रिषुलोकेषु विद्यते
वरं वरय भद्रं ते वरदोऽहं तवाग्रतः । मद्दर्शनात्ते कामः स्यात्संसिद्धो विद्धि नारद!

नारद उवाच

वरदो यदि मे देव! वरार्हो यदिवाऽप्यहम् । भक्तिं तवपदाम्भोजेनिश्चलांदेहिमेविभो!

मच्छिलासन्निधानं च नत्याज्यंतेकदाचन । मत्तीर्थदर्शनात्स्पर्शात्स्नानादाचमनात्तथा।
देहेन युज्यते देहस्तृतीयस्तु वरो मम ॥ ४२ ॥

श्रीभगवानुवाच

एवमस्तु तव स्नेहात्तव तीर्थे वसाम्यहम् । चराचराणां जन्तूनां विदेहाय न संशयः
एवमुक्त्वा हरिः साक्षात्तत्रैवाऽन्तरधीयत । नारदोऽपिमहातेजादिनानि कतिचित्सह
बदरीमावसन्हृष्टो ययौ मधुपुरीं ततः ॥ ४४ ॥

स्कन्द उवाच

मार्कण्डेयशिलायास्तुमहिमानंवदस्वमे । किंपुण्यंकिंफलंतस्याः सञ्ज्ञाचतादृशीकथम्

शिव उवाच

पुरा त्रेतायुगस्यान्ते मृकण्डुतनयो महान् । स्वल्पायुषं निजं ज्ञात्वाजजापपरमंजपम्
द्वादशाक्षरमन्त्रेण पूजितो हरिरव्ययः । सप्तकल्पायुषं ज्ञात्वा तत्रैवाऽन्तरतो ययौ
मार्कण्डेयस्ततः श्रुत्वातीर्थाटनपरिश्रमम् । दर्शनं नारदस्याऽऽसीन्मथुरायां षडानन!
पूजितो वन्दितस्तेन नारदो मुनिसत्तमः । कथयामास माहात्म्यं बदर्या यत्र केशवः

नारद उवाच

किमिति क्लिश्यते साधोतीर्थाटनपरिश्रमैः । बदर्याख्यं महाक्षेत्रंसान्निध्यं नित्यदाहरेः
तत्र याहि यत्र साक्षाद्धरिं पश्यसि चक्षुषा ।
तच्छ्रुत्वा विस्मयोपेतो विशालामाययावृषिः ॥ ५० ॥

स्नात्वा शिलामुपविशञ्जजापाऽष्टाक्षरं परम् । ततः प्रसन्नोभगवांस्त्रिरात्र्यन्ते जनार्दनः
शङ्खचक्रगदापद्मवनमालाविभूषणम् । तं दृष्ट्वा सहसोत्थाय प्रेमगद्गदया गिरा ॥
तुष्टाव प्रणतो भूत्वा मार्कण्डेयो जनार्दनम् ॥ ५३ ॥

मार्कण्डेय उवाच

अशाश्वते च संसारे सारे ते चरणाम्बुजे । समुद्धारः कथं नृणां त्राहि मां परमेश्वर!
तापत्रयपरिश्रान्तमनेकाज्ञानजृम्भितम् । संसारकुहरे भ्रान्तं त्राहि मां कृपयाऽच्युत!
अनेकयोनियन्त्रेषु निःसृतेस्तनुवेदनाम् । गर्भवासकृतां प्राप्तं त्राहि मां करुणाम्बुधे

कृमिभक्षितसर्वाङ्गं क्षुत्पिपासाकुलं च हि । आन्त्रमालाकुले गर्भे त्राहि मां मधुसूदन!
अमेध्यादिभिरालिप्तं निश्चेष्टश्रममाऽऽकुलम् ।
स्मरन्तं निजकर्मोत्थं त्राहि मां मधुसूदन !॥ ५८ ॥

वचनादाननिःश्वासाशक्तं भयमुपागतम् । गर्भवासमहादुःखं त्राहि मां मधुसूदन ! ॥
जरामरणबाल्यादिदुःखसंसारपीडितम् । दुःखाब्धौ सुखबुद्धिमांकृपासिन्धोप्रपालय
कदचित्कृमितां प्राप्तं कदाचित्स्वेदजन्मिताम् ।
कदाचिदुद्भिज्जत्वं च कदाचिन्नरतां गतम् ॥ ६१ ॥

सर्वयोनिसमापन्नं विपन्नं विगतप्रभम् । अनाथं त्वां समापन्नं त्राहिमांकृपयाऽच्युत
एवं स्तुतस्ततः कृष्णो मार्कण्डेयेनधीमता । प्रीतस्तमाह विप्रर्षे!वरं मे व्रियतामिति

श्रीमार्कण्डेय उवाच

यदि तुष्टो भवान्मह्यं भगवन्दीनवत्सल । निश्चलां देहि मे भक्तिं पूजायांदर्शने तव
शिलायां तव सान्निध्यमेष एव वरो मम ॥ ६४ ॥

सूत उवाच

तथेत्युक्त्वामहाविष्णुर्ययावन्तर्हितं द्विज !। मार्कण्डेयस्ततस्तुष्टोजगामपितुराश्रमम्
उपस्थानमिदं पुण्यं सर्वपापप्रणाशनम् । शृणुयाच्छ्रावयेन्मर्त्यो गोविन्देलभतेगतिम्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे
शिवकार्त्तिकेयसम्वादेअग्नितीर्थनारदशिलामार्कण्डेयशिलामाहात्म्य-
वर्णनंनाम तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः

गरुडशिलावाराहीशिलानारसिंहीशिलामाहात्म्यवर्णनम्

स्कन्द उवाच

वैनतेयशिलायास्तुमाहात्म्यं वद मेपितः !। किंपुण्यंकिंफलंचास्यअनुभावंचकिंभवेत्

शिव उवाच

कश्यपाद्विनतागर्भे महाबलपराक्रमौ । गरुडारुणौ प्रजातौ द्वावरुणः सूर्यसारथिः ॥२

बदर्य्यां दक्षिणे भागे गन्धमादनशृङ्गके । गरुडस्तप आतेपे हरिवाहनकाम्यया ॥ ३ ॥

फलमूलजलाहारो निर्द्वन्द्वो जपताम्वरः । पदैकेनोपसङ्क्रम्य भुवि जेपे निरामयः ॥ ४

त्रिंशद्वर्षसहस्राणि हरिदर्शन लालसः । ततस्तु भगवान्साक्षात्पीतवासा निजायुधः

आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः ।

उवाच वचनं सम्यङ् मेघगम्भीरनिस्वनः ॥ ६ ॥

तथापि न बहिर्वृत्तिर्दध्मौ दरवरं ततः । तथापि न बहिर्वृत्तिर्गरुडस्य महात्मनः ॥

ततः प्रविश्य भगवानन्तरं पवनक्रमात् । बहिरुन्मुखतां चैव रचयन्बहिराबभौ ॥८॥

भगवन्तं हरिं दृष्ट्वा गरुडो गतसाध्वसः । पुलकाङ्कितसर्वाङ्गस्तुष्टाव विहिताञ्जलिः

गरुड उवाच

जयजयत्रिभुवनजनमनोभवनविदलिताघगुणसकलगीर्वाणवन्दितचरणकमलयुगल-परिमलबहलरिपुवनविभञ्जन विद्योतमान सकलसुरासुरमुकुटकोटिविलसितनिज-पीठकमल निरसितनिजजनहृदयतिमिरपटलबहल हिमकर इवत्रिविधसन्तापसन्दो-हहरणचरण जगदुदयस्थितिलयविलासविलसितत्रिविधमूर्तिकीर्तिविस्फूर्जितजग-दुदयसन्दोह दिनकर इव निजजनमानससरोजषट्पदविदितसकलवेदविद्योतमान-मानस निजजनमुनिजनवन्दितपदनखनीरपवित्रीकृतगीर्वाणमुनिमानसवन्दितचरण

रजः प्रसादसारभूत! जगतामधीश ! नमस्ते नमस्ते ॥

अपि च

अष्टशक्तिसहितो वनमाली पीतचैलकुसुमावलिशोभः ।

पङ्कजाकरविराजितपादः पातु मामवहितेन्द्रियवर्गः ॥ ११ ॥

भक्तहृत्कमलराजितमूर्तिर्दुष्टदैत्यदलनोत्थितकीर्तिः ।

बद्धसेतुरविताश्रितलोकः पातु मामनुदिनं भुवनेशः ॥ १२ ॥

स्थिरचलत्रिविधतापहिमांशुर्भासमानतरणिप्रतिभासः ।

एक एव बहुधा कृतवेषो माययाऽवतु महामतिरीशः ॥ १३ ॥

भक्तचिन्तनकृते कृतरूपः शैशवेन बहुशासितभूपः ।

वेदमार्ग उरुधाहितकारी रीतिरीशितुरियं गुणशाली ॥ १४ ॥

यज्ञभुग्घृदयबन्धनधारी विश्वमूर्तिरबलांशुकहारी ।

पालनेऽपि महताम्बहुदेहो रास एष तनुमानवतान्नः ॥ १५ ॥

प्रेमभक्तिपुरुषैरुपलभ्यः पूरुषः कृतसमस्तनिवासः ।

दास्यवृन्दहृदितो निजदासः प्रेक्षणैककरुणोऽवतु विश्वम् ॥ १६ ॥

कण्ठलम्बिततरस्नुनखाग्रकृष्टगोपतरुणीकुचभारः ।

लीलया युवतिभिः कृतवेषः शेष एष भवतादुपशान्त्यै ॥ १७ ॥

दण्डपाणिरयमेव जनानां शासितात्मनियमोक्तहितानाम् ।

पावनाय महतामनुशाली विश्वदुःखशमनो भवतान्नः ॥ १८ ॥

एवं स्तुतस्ततः साक्षाद्गरुडेन महात्मना । पूजार्थमाजुहावैनां गङ्गां त्रिपथगामिनीम्

ततः पञ्चमुखी साक्षादाविरासीन्नगोपरि । तेनोदकेन पादार्घं चकार विनतासुतः ॥

व्रियताम्वर इत्युक्तो गरुडो हरिणा ततः । तवैकवाहनः श्रीमान्बलवीर्यपराक्रमः ॥

अजेयो देवदैत्यानां स्यामहं ते प्रसादतः ॥ २१ ॥

इयं मन्नामविख्यातासर्वपापहराशिला । एतस्याःस्मरणात्पुंसांविषव्याधिर्नजायताम्

एवमुक्त्वा ततस्तूष्णीं बभूव विनतासुतः ।

ओमित्युक्त्वा ततो विष्णुरुवाचेदं वचो हितम् ॥ २३ ॥

बदरीं त्वं प्रयाहीति नारदेन निवेदिताम्। स्नानं नारदतीर्थादावुपवासत्रयं शुचिः॥
कृत्वा मद्दर्शनं तत्र सुलभं ते भविष्यति ॥ २४ ॥
इत्युक्त्वाऽन्तर्दधे विष्णुस्तडित्सौदामनी यथा।
गरुडस्तु ततः शीघ्रमागत्य बदरीं मुदा ॥ २५ ॥
वह्नितीर्थं समासाद्य शिलामाश्रित्यतत्परः। स्नात्वा नारदतीर्थेषु व्रतचर्यामथाकरोत्
ततस्तु नारदे तीर्थे दृष्ट्वा भगवतः स्थितिम्। नमस्कृत्य विधानेन तदाज्ञातः पुरंययौ
ततः प्रभृति त्रैलोक्ये गारुडीति शिलोच्यते ॥ २८ ॥

स्कन्द उवाच

वाराहावदमाहात्म्यंकीदृशंहीश्वरेश्वर। किंपुण्यंकिं फलंतस्या अभिधानंतथाकथम्

शिव उवाच

रसातलात्समुद्धृत्य महीं दैवतवैरिणम्। हिरण्याक्षं रणे हत्वा बदरीं समुपागतः॥
आकल्पान्तंमहादेवोयोगधारणयास्थितः। बदर्यांसौष्ठवादेव विदधे स्थितिमात्मनः
शिलारूपेण भगवान्स्थितिं तत्र चकारह। तत्रगत्वा तु मनुजः स्नात्वागङ्गाजलेऽमले
दानं दत्त्वा स्वशक्त्या वै गङ्गाम्भःशान्तमानसः।
अहोरात्रे स्थितो भूत्वा जपेदेकाग्रमानसः ॥ ३३ ॥
शिलायान्देवदृष्टिश्च तस्य पुंसः प्रजायते। बहुना किमिहोक्तेन यद्यदिच्छति साधकः॥
तत्तस्य सिध्यति क्षिप्रं यद्यपि स्यात्सुदुष्करम् ॥ ३५ ॥

स्कन्द उवाच

नारसिंही शिलायास्तु माहात्म्यंवद मे प्रभो। त्वत्प्रसादान्महादेव दुर्लभंश्रुतवानहम्

शिव उवाच

हिरण्यकशिपुं हत्वा नखाग्रेणैव लीलया। क्रोधाग्निना प्रदीप्ताङ्गः प्रलयानलसन्निभः
तदा देवै समागत्यस्थित्वादूरेदयालुभिः। स्तुतोऽसौ भगवान्देवोलीलयाधृतविग्रहः
तदा प्रसन्नो हरिरुग्रविक्रमः स्वतेजसा व्याप्तसुरासुरोत्तमः।
उवाच मत्तो वरमावृणीध्वं गीर्वाणनिर्वाणसुखैकहेतुम् ॥ ३६ ॥

तदा सुराणामधिपः स्वयंभूरुवाच वाक्यं स्मितशोभिताननः।
रूपं तवाऽत्युग्रमशेषदेहिनां भयावहं संहर नारसिंह !॥ ४० ॥
अनेकधैतद्विधिवद्विधाय निधाय शैलादिषु दिव्यमूर्तिम्।
उवाच किं वः प्रकरोमि कृत्यमहं प्रसन्नस्त्रिदशाः परन्तपाः ॥ ४१ ॥
ततोऽमरा ऊचुरनेन चैव रूपेण संक्षोभितविश्वमूर्ते !।
प्रशान्तमन्तःसुखहेतुबन्धि चतुर्भुजत्वं वरमीप्सितं नः ॥ ४२ ॥
ततो हरिर्वीक्ष्य निरीक्षणेन दिव्येन विश्वं प्रययौ विशालाम्।
गङ्गाजले क्रीडति विष्टचेताः सुरासुरेभ्यो भगवानुवाच ॥ ४३ ॥
ततोऽमराः शान्तभया अथैनं निरीक्ष्य देवं जलमध्यसंस्थम्।
नत्वा परिक्रम्य तदा समाययुर्निरूढभावाः स्वपुरं ततः क्रमात् ॥ ४४ ॥
ततः समस्ता ऋषयस्तपोधनाः समाययुर्भक्तिभरावनम्राः।
नृसिंहमत्यद्भुतविक्रमं हरिं समीडिरे बद्धकरा वचोभिः ॥ ४५ ॥

ऋषय ऊचुः

नमो नमस्ते जगतामधीश! विश्वेश! विश्वाभय! विश्वमूर्ते !।
कृपाम्बुराशे भजनीयतीर्थपादाम्बुज! श्रीश दयाम्बिधेहि ॥ ४६ ॥
एकोऽसि नाना निजमायया स्वया घटे पयो यद्वदुपाधिभिन्नम्।
भक्तेच्छयोपात्तविचित्रविग्रह! प्रसीद विश्वानन! विश्वभावन !॥ ४७ ॥
ततः प्रसन्नो भगवान्नृसिंहः सिंहविक्रमः। उवाच वचनञ्चारु वरं मे व्रियतामिति ॥

ऋषय ऊचुः

यदिप्रसन्नोभगवान्कृपयाजगताम्पते। विशालान परित्याज्यावरोऽस्माकमभीप्सितः
एवमस्तु ततः सर्वे स्वाश्रमं ह्यृषयोययुः।
नृसिंहोऽपि शिलारूपी जलक्रीडापरोऽभवत् ॥ ५० ॥
उपवासत्रयं कृत्वा जपध्यानपरायणः। नृसिंहरूपिणं साक्षात्पश्यत्येव न संशयः॥
य एतच्छ्रद्धया मर्त्यः शृणोति श्रावयञ्छुचिः।

सर्वपापविनिर्मुक्तो वैकुण्ठे वसतिं लभेत् ॥ ५२ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे-
बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसम्वादे गरुडशिला-
वाराहीशिलानारसिंहीशिलामाहात्म्यवर्णनं नाम
चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः

भगवतोविष्णोःपूजादर्शनादिविषयेविधिवर्णनम्

स्कन्द उवाच

किमर्थं भगवांस्तत्रवसतिश्रद्धयापुनः । किं पुण्यं किं फलं तस्य दर्शनस्पर्शनादिभिः
नैवेद्यभक्षणंचाऽपि महापूजाकृतेस्तथा । प्रदक्षिणस्य च फलं ब्रूहि मे कृपया पितः॥

शिव उवाच

पुरा कृतयुगस्यादौ सर्वभूतहिताय च । मूर्तिमान्भगवांस्तत्र तपोयोगसमाश्रितः ॥
त्रेतायुगे ह्यृषिगणैर्योगाभ्यासैकतत्परः । द्वापरे समनुप्राप्ते ज्ञाननिष्ठो हि दुर्लभः ॥४॥
ऋषीणां देवतानां च दुर्दर्शो भगवानभूत् । ततो ह्यृषिगणा देवा अलभ्यभगवद्गतिम्
स्वायम्भुवं पदं याता विस्मयाकुलचेतसः । तत्र गत्वा नमस्कृत्य ऊचुर्लोकेश्वरंमुदा
बृहस्पतिं पुरस्कृत्य ऋषयश्च तपोधनाः ॥ ६ ॥

देवा ऊचुः

नमस्ते सर्वलोकानामाश्रयः शरणार्तिहा । वृत्तिदः करुणापूर्णः पितामह सुरेश्वर ॥
निवेदनीया विपदः समुद्धर्ता पिताऽसि नः ॥ ७ ॥

ब्रह्मोवाच

किमर्थमागता यूयं विस्मयाकुलमानसाः । मिलिताऋषिभिःसाकंब्रूतागमनकारणम्

देवा ऊचुः

द्वापरे समनुप्राप्ते विशालायां विशालधीः । भगवान्दृश्यते नैव तत्र किं कारणं वद ॥
विशाला किं परित्यक्ता ततो वा क्व गतः स्वयम् ।
अपराधादुताऽस्माकं कथं चाऽसौ प्रसीदति ॥ १० ॥

ब्रह्मोवाच

नाहमेतद्विजानामिश्रुतं चाऽद्य मुखाद्धि वः । को हेतुर्दृक्पथातीतोभगवान्भवतांसुराः
आगच्छत वयं यामस्तीरं क्षीरपयोनिधेः ॥ ११ ॥

इत्युक्तास्ते पुरोधाय ब्रह्माणं त्रिदिवौकसः । ययुः क्षीराम्बुधेस्तीरमृषयश्चतपोधनाः
तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिम् । गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरम् ॥

ब्रह्मोवाच

नमस्ते पुरुषाध्यक्ष ! सर्वभूतगुहाशय !। वासुदेवाऽखिलाधार! जगद्धेतो! जगन्मय !
त्वमेव सर्वभूतानां हेतुः पतिरुताऽऽश्रयः । मायाशक्तिमुपाश्रित्य विचरस्येकसुन्दर!
एको नानायते योऽसौ नटवज्जायतेऽव्ययः । व्यापकोऽपिकृपालुत्वाद्भक्तहृत्पद्मषट्पदः
ददाति विविधानन्दं तं वन्दे जगताम्पतिम् ॥ १६ ॥

देवा ऊचुः

विपद्धान्ते हुतभुग्जनानां गृहीतसत्त्वस्त्रिदशावनीशः ।
चराचरात्मा भगवाननन्ते कृपाकटाक्षैरवलोकतां नः ॥ १७ ॥
सकृद्यन्नामपीयूषरसपानपरः पुमान् । निःश्रेयसं तृणमिव मन्यते तं हरिं भजे ॥ १८॥
अविद्याप्रतिबिम्बत्वाज्जीवभावमुपागतः ।
विज्ञत्वादुपशान्तात्मा स पुनातु जगत्त्रयम् ॥ १९ ॥

गन्धर्वा ऊचुः

पिबन्ति ये हरेः पदाम्बुसङ्गलेशतः पयः पयो न ते पुनःपुनः पिबन्ति मातुरङ्कतः
प्रसङ्गतो यदाऽभिधासुधां निपीय मानवा,
मृताऽमृतं व्रजन्त्यधो न जातु यान्त्यशङ्किताः ॥ २० ॥

ततःस्तुतोहरिःसाक्षात्सिन्धोरुत्थायचाऽब्रवीत् । अलक्षितोऽपरैर्ब्रह्मापरंतद्वेदनापरः
ब्रह्मा तदुपधार्याऽथ नत्वा तस्मै दिवौकसः । बोधयामाससकलं सुराःशृणुतसादरम्
अन्तर्हितोऽसौ भगवान्दृष्ट्वा लोकान्कुमेधसः । श्रुत्वेत्थंवचनंतस्य सर्वेदेवादिवंययुः

ततोऽहं यतिरूपेण तीर्थान्नारदसञ्ज्ञकात् ।
उद्धृत्य स्थापयिष्यामि हरिं लोकहितेच्छया ॥ २४ ॥

यस्य दर्शनमात्रेण पातकानि महान्त्यपि । विलीयन्ते क्षणादेव सिंहं दृष्ट्वा मृगा इव
धर्माधर्मान्विजित्याऽथबदरीशंविभंहरिम् । दृष्ट्वामुक्तिमुपायान्तिविनाऽऽयासंषडानन
त्यक्तप्रायाणि तीर्थानि हरिणा कलिकालतः । बदरींसमनुप्राप्यसाक्षाद्देवाऽवतिष्ठते
कलिकालमनुप्राप्य मुक्तिर्येषामभीप्सिता । द्रष्टव्या बदरीतैस्तुहित्वातीर्थान्यशेषतः
विना ज्ञानेन योगेन तीर्थाटनपरिश्रमैः । एकेन जन्मना जन्तुः कैवल्यं पदमश्नुते ॥
जन्मान्तरसहस्रैस्तुयेनचाऽऽराधितो हरिः । स गच्छेद्बदरींद्रष्टुं यत्र जन्तुर्नशोचति
बदरीबदरीत्युक्त्वा प्रसङ्गान्मनुजोत्तमः । संसारतिमिराबाधे दीपमुज्ज्वालयत्यसौ
यथा दीपावलोकेन तमोबाधा न जायते । तथैव बदरीं दृष्ट्वा पुंसो मृत्युभयं कुतः ॥
दर्शनाद्यस्य पापानि रुदन्त्यव्याहतानि च । मुक्तिमार्गमुपालक्ष्य तं वन्दे बदरीपतिम्
सशैलकानना भूमिर्दशधा दक्षिणीकृता । हरेः प्रदक्षिणं तद्वद्बदर्यां तत्पदेपदे ॥ ३४॥
अश्वमेधे तु यत्पुण्यं वाजपेयशतेन च । हरेः प्रदक्षिणातद्वद्बदर्यां तत्पदे पदे ॥३५॥
चतुर्मासे तु यत्पुण्यं ब्रह्माण्डदानतस्तथा । हरेः प्रदक्षिणं तद्वद्बदर्यां तत्पदेपदे ॥३६
अतिकृच्छ्रैर्महाकृच्छ्रैश्छान्दसैः सुकृतं भवेत् । हरेः प्रदक्षिणं तद्वद्बदर्यां तत्पदेपदे ॥
बदर्यां विष्णुनैवेद्यं सिक्थमात्रं षडानन !। अशनाच्छोधयेत्पापंतुषाग्निरिव काञ्चनम्
यदन्नं भगवानत्ति ऋषिभिर्नारदादिभिः । तत्सत्त्वशुद्धये सर्वैर्भोक्तव्यमविचारितम्

अमरा अपि यन्नूनं व्याजेनेच्छन्ति सर्वतः ।
भोक्तुं बदरिकां विष्णोनैवेद्यं यान्ति तत्पराः ॥ ४० ॥

भोजनानन्तरं विष्णोः प्रगच्छन्तिस्वमालयम् । प्रह्लादप्रमुखाभक्ताःप्रविशन्तिहरेःपदम्
बाल्ययौवनवार्द्धक्ये यत्पापं ज्ञानतः कृतम् । नैवेद्यभक्षणाद्विष्णोर्बदर्यां तद्विलीयते

प्राणान्तं यस्य पापस्य प्रायश्चित्तं प्रकीर्तितम् ।
विष्णोर्निवेदितं भुक्त्वा बदर्यां तन्निवर्त्तते ॥ ४३ ॥

तीर्थान्तरेषु यत्नेन मुक्तिं गच्छति मानवः । नैवेद्यभक्षणाद्विष्णोःसालोक्यंलभतेनरः
हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः । पादोदकं सनिर्माल्यं मस्तके यस्य सोऽच्युतः
ब्रह्महत्या सुरापानं स्तेयंगुर्वङ्गनागमः । नैवेद्यभक्षणाद्विष्णोर्बदर्यांयान्ति सङ्क्षयम्
बदरीसदृशं क्षेत्रं नैवेद्यसदृशं वसु । नारदीयसमं क्षेत्रं न भूतं न भविष्यति ॥ ४७ ॥
बदरी यत्नतो गम्या भोक्तव्यं तन्निवेदितम् । द्रष्टव्योभगवान्वह्नितीर्थेस्नानंसुदुर्लभम्

पृथिव्यां यानि तीर्थानि व्रतानि नियमास्तथा ।
पादोदकं विशालायां पावनं पुरतो भवेत् ॥ ४६ ॥

किं तस्य दानैस्तपसा तीर्थाटनपरिश्रमैः । बदर्यां विष्णुपादोदबिन्दुमात्रं लभेद्यदि
प्रायश्चित्तानि जल्पन्ति तावदेव षडानन !। यावन्नलभ्यते विष्णोर्बदर्यां चरणोदकम्
अनायासेनयेषां वाञ्छामुक्तिपथेनृणाम् । कर्त्तव्यं तैः प्रयत्नेन विष्णोर्नैवेद्यभक्षणम्
ये नराःप्रतिगृह्णन्ति पापाः संसारभागिनः । यात्राकृतं फलं तेषां न कदाचित्प्रजायते
नैवेद्यनिन्दनाद्विष्णोर्निन्द्यन्ते ते तमोगताः । नैवेद्यभक्षणात्सत्त्वशुद्धिरेवन संशयः
नैवेद्यं स्वयमानीय ब्राह्मणान्भोजयन्ति ये । तुलापुरुषदानेन किं फलं ते कृतार्थिनः ॥
कुरुक्षेत्रं समासाद्य राहुग्रस्ते दिवाकरे । महादानेन यत्पुण्यं बदर्यां ग्रासमात्रतः ॥
बदरीक्षेत्रमासाद्य ग्रासमात्रं प्रयत्नतः । उपायोऽयं महांस्तत्र बदर्यां हरितोषणे ।

यतिभ्यो भोजनाद्विष्णोरपराध्यपि वल्लभः ॥ ५७ ॥

न विष्णोः सदृशो देवो न विशालासमापुरी । न भिक्षुसदृशंपात्रमृषितीर्थसमंन हि
चातुर्मास्यंप्रकुर्वन्ति ये नराःपुण्यशालिनः । तेषां पुण्यफलं वक्तुं ब्रह्मणाऽपिनशक्यते
भिक्षुकाणांफलावाप्तिर्विशेषादिहकीर्त्यते । वेदान्तश्रवणात्पुण्यंदशधायत्प्रकीर्तितम्
बदरीदृष्टिमात्रेण भिक्षुकाणां तदिष्यते । चातुर्मास्ये विशेषेण कैवल्यफलभागिनः
न्यासिनो बदरीस्थाने विनायासेन पुत्रक !। येमूर्खाजाड्यमापन्नादम्भकाषायवाससः

बदरीदर्शनात्तेषां मुक्तिः करतले स्थिता ॥ ६२ ॥

ज्ञानिनोऽज्ञानिनोवापिन्यासिनोनियतव्रताः। द्रष्टव्याबदरीतैस्तुफलानिसमभीप्सुभिः
श्रुत्वाऽध्यायमिमं पुण्यं प्रसङ्गेनाऽपिमानवः। सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसम्वादे तद्धाममाहात्म्यवर्णनं-नाम पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

ससरस्वतीसरिद्वर्णनम्वसुधारामाहात्म्यकथनम्

स्कन्द उवाच

कराद्विगलितं यत्र कपालं ते महेश्वर !। तस्य तीर्थस्यमाहात्म्यं कृपया वदमे पितः!

शिव उवाच

अतिगुह्यमिदं तीर्थं सुरासुरनमस्कृतम्। ब्रह्महाऽपि नरो यत्र स्नानमात्रेण शुद्ध्यति
पञ्चतीर्थानि तिष्ठन्ति कपाले पापमोचने। तत्र स्नानं तपोदानं सर्वमक्षयमिष्यते॥
पिण्डंविधायविधिवन्नरकात्तारयेत्पितॄन्। पितृतीर्थमिदम्प्रोक्तंगयातोऽष्टगुणाधिकम्
तिलतर्प्पणतो यान्ति पितरः स्वर्गमुत्तमम् ॥ ५ ॥
अहोरात्रं स्थिरो भूत्वा जपनिष्ठःसमाहितः। तस्यैष्टसिद्धिर्महती तत्क्षणादेवजायते
पारलौकिककर्माणिसर्वाण्यव्यहतानिच। कपालमोचने तीर्थे नाऽधिकं पितृकर्मणि

स्कन्द उवाच

कुत्र वा ब्रह्मतीर्थम्वै फलं वा कीदृशं भवेत्। के वा तत्र वसन्तीहकृपयावदमे पितः!

शिव उवाच

एकदाविष्णुनाभ्यम्भोरुहस्थस्यप्रजापतेः। वेदान्मुखाम्बुजाद्धृत्वाजग्मतुर्मधुकैटभौ
ततो ह्युत्थायशयनात्सिसृक्षुरब्जसम्भवः। स्रष्टुंविनाऽऽगमंलोकेन शशाकहतस्मृतिः

तदा बदरिकामेत्य हरिणा प्रतिपालिताम्। तुष्टाव प्रणतो भूत्वा भगवन्तंसनातनम्
ततः कुण्डात्समुद्भूतो हयशीर्षो निजायुधः।
पीताम्बरधरः शुक्लश्चतुर्बाहुः सुदुस्सहदृक् ॥ १२ ॥
अत्यद्भुतः प्रकटकठोरलोचलनश्चलच्छटाविच्छुरितमेघडम्बरः।
स्वतेजसा हतनिखिलप्रभाकुलः कृपान्वितो द्रुहिणपुरःसरोऽभवत् ॥ १३ ॥
निरीक्ष्य तं विधिरपि विस्मयाकुलः प्रणम्य च स्तुतिमकरोत्प्रसन्नदृक् ॥१४॥

ब्रह्मोवाच

नमः कमलनाभाय नमस्ते कमलाश्रय !। नमस्ते कमलावास! विशालवनमालिने ॥
नमो विज्ञानमात्राय गुहावासनिवासिने। हृषीकेशाय शान्ताय तुभ्यं भगवते नमः ॥
स्वभक्तरक्षणकृते धृतदेहाय शार्ङ्गिणे। अनन्तक्लेशनाशाय गदिने ब्रह्मणे नमः ॥१७॥
संसारविविधासारनिवृत्तिकृतकर्मणे। रक्षित्रे सर्वजन्तूनां विष्णवेजिष्णवे नमः ॥
नमो विश्वम्भराशेषनिवृत्तगुणवृत्तये। सुरासुरवरस्तम्भनिवृत्तिस्थितिकीर्तये ॥१९॥
इतीरितः सुरपतिना महेश्वरो हृदि स्थितोऽखिलविदशेषकर्मभिः।
ततोऽन्तरं सपदि गतो निबध्य तौ सुरद्रुहौ किल निजघान लीलया ॥ २० ॥
ततो निगममासाद्य ब्रह्मणोऽन्तिकमाययौ।
दत्त्वा स्वनिगमं तस्मै स्वस्थोऽभूत्स समीडितः ॥ २१ ॥
ततःप्रभृतितत्तीर्थं ब्रह्मणा प्रकटीकृतम्। ब्रह्मकुण्डमितिख्यातंत्रिषु लोकेषु विश्रुतम्
यस्यदर्शनमात्रेणमहापातकिनो जनाः। विमुक्तकिल्बिषा सद्यो ब्रह्मलोकम्व्रजन्तिते
स्नानंकुर्वन्ति ये लोकाव्रतचर्यामथापि वा। ब्रह्मलोकमतिक्रम्यविष्णुलोकंव्रजन्तिते

स्कन्द उवाच

ततः किमकरोद्धाता लब्ध्वावेदाञ्जनार्द्दनात्। एतदन्यच्च सर्वम्मे कृपयावदसाम्प्रतम्

महादेव उवाच

चतुर्णामपि वेदानां दृष्ट्वा बदरिकाश्रमम्। मतिर्न जायते गन्तुं ब्रह्मणा सह पुत्रक ॥
ततस्तु विकलंदृष्ट्वाब्रह्माणंजनवासिनः। सिद्धास्तु विधिवत्स्तुत्वा प्रणिपत्येदमब्रुवन्

सिद्धा ऊचुः

आज्ञा भगवतःकार्या सर्वैः स्थावरजङ्गमैः । भगवान्सर्वजन्तूनां कर्त्ता हर्तापितागुरुः
स्थितिर्ब्रह्मान्तिकेवश्चहरिणैवाऽनुकल्पिता । निवृत्तिर्वर्तते चैषा तथाप्येतन्निरामयम्
एकान्तेद्रवरूपेण मूर्तिर्वोऽत्रावतिष्ठताम् । द्वितीया ब्रह्मणा सार्द्धं ब्रह्मलोकम्व्रजेत्पुनः
ततः सहृदया वेदा द्वैधीकृतात्मरूपकाः । ब्रह्मणा ब्रह्मलोकं ते ययुः सार्द्धं प्रहर्षिताः
ततस्त्रिलोकं विधिवत्ससर्ज चतुराननः । द्रवरूपेषु वेदेषु स्नानदानतपः क्रियाः

कृता विच्छेदिता न स्युर्यावदाभूतसम्प्लवम् ॥ ३२ ॥

फलमुद्दिश्य कुर्वन्ति उपवासत्रयं नराः । चतुर्णामपिवेदानां व्याख्यातारोनसंशयः
अनुक्रमेण तिष्ठन्ति वेदाश्चत्वार एव च । ऋग्यजुः सामाथर्वाख्याभगवत्पार्श्ववर्तिनः
ये पुण्यवन्तोऽकलुषा वेदवेदाङ्गपारगाः । ते वेदघोषं विरलाः शृण्वन्त्यऽपिकलौयुगे
चतुर्णामपि वेदानामुदगस्ति सरस्वती । जप्ताऽथ सा नृणांहन्तिजडतांजलरूपिणी

सरस्वत्या जले स्थित्वा जपं कृत्वा समाहितः ।

मनोस्तस्य न विच्छेदः कदाचिदपि जायते ॥ ३७ ॥

वेदव्यासोऽपि भगवान्यत्प्रसादादुदारधीः । पुराणसंहितार्थज्ञोऽभवदत्र न संशयः ॥

त्रयाणामपि लोकानां हिताय जगताम्पतिः ।

स्थापयामास विधिना वाणीं वाग्विभवप्रदाम् ॥ ३९ ॥

दर्शनस्पर्शनस्नानपूजास्तुत्यभिवन्दनैः । सरस्वत्या न विच्छेदःकुलेतस्य कदाचन ॥
मन्त्रसिद्धिर्विशेषेण सरस्वत्यास्तटे नृणाम् । जपतामचिरेणैवजायतेनाऽत्र संशयः
बहुना किमिहोक्तेन वाणी वाग्विभवप्रदा । द्रवरूपधरा नृणां दर्शनात्पूतिरुज्ज्वला ॥
ततोऽर्वाग्दक्षिणे भागे द्रवधारेति विश्रुतम् । तीर्थमिन्द्रपदं यत्र तपश्चक्रे पुरन्दरः ॥
सुदारुणं तपः कृत्वा परितोष्यजनार्द्दनम् । पदमैन्द्रं समालेभे सुरासुरनमस्कृतम् ॥४४
तपोदानं जपो होमो व्रतानिनियमायमाः । तत्राऽनन्तगुणं प्रोक्तंतत्तीर्थमतिदुर्लभम्
प्रतिमासे त्रयोदश्यांशुक्लायांहरितोषगे । स्नात्वासुतीर्थेसुत्रामाच्छन्दंचोपेत्यसङ्गतः

उपवासद्वयं कृत्वा पूजयित्वा जनार्द्दनम् ।

सर्वपापविनिर्मुक्तः शक्रलोके महीयते ॥

तत्रैव मानसोद्भेदः सर्वपापप्रणाशनः । दुर्लभः सर्वजन्तूनां यत्र ते स्युर्महर्षयः ॥४८
मानसंचिदचिद्ग्रन्थिमुद्ग्रथ्नन्तिचसर्वतः । मानसोद्भेदइत्याख्याऋषिभिःपरिगीयते

भिन्दन्ति हृदयग्रन्थींश्छिन्दन्ति बहुसंशयम् ।

कर्माणि क्षपयन्त्यस्मान्मानसोद्भेद इत्यभूत् ॥ ५० ॥

यदि भाग्यवशादत्र बिन्दुमात्रंलभेन्नरः । तत्क्षणान्मुक्तिमाप्नोतिकिमतस्त्वधिकंभवेत्

गिरिदरीनिलये निवसन्त्यमी ऋषिगणाः फलमूलजलाशनाः ।

जितमनोविषयाः शितबुद्धयः कलिभयादिव पापभयाकुलाः ॥ ५२ ॥

फलसमीरणगह्वरनिर्भराश्रमभरादुपलब्धपटोत्तमाः ।

त्रिषवणक्रमनिर्जितदुर्जयेन्द्रियपराक्रमणा मुनयस्त्वमी ॥ ५३ ॥

साधनानि बहून्येव कायक्लेशकराण्यहो । सुलभं साधनं लोके मानसोद्भेददर्शनम्
यस्मिन्दिने जलं चैतल्लभते पुण्यवाञ्जनः । भवति व्याससदृशो यमपितृसमः क्रमात्
काम्यतीर्थमिदं नृणां कामनावशकृत्पुनः । अकामतस्तु मुक्तिः स्यादुभयोरेषनिश्चयः
यदिकश्चित्प्रमादेन कामानां कुरुते नरः । फलं भुक्त्वा पुनर्मुक्तिर्भवत्येव न संशयः ॥
महरादिषु लोकेषुभुक्त्वाभोगान्यथेप्सितान् । भोगेभुक्तेपुनर्यातिकामनावशतोजनः
पुरुषार्थसमावाप्त्यै यतनीयं मनीषिभिः । मानसोद्भेदने तीर्थे नापेत्यत्रेति मे मतिः
मानसोद्भेदनात्प्रत्यग्दिशि सर्वमनोहरम् । वसुधारेतिविख्यातंतीर्थंत्रैलोक्यदुर्लभम्
त्रिलोक्यां सर्वतीर्थेभ्यः श्रेष्ठो बदरिकाश्रमः । श्रुत्वातन्नारदात्सर्वेवसवःसमुपागताः
त्रिशद्वर्षसहस्राणि तपः परमदारुणम् । दलाम्बुप्राशनाश्चक्रुस्ततः सिद्धिमुपाययुः ॥

भगवद्दर्शनात्प्राप्तानन्दनिर्वृत्तविक्रमाः ।

हृदयानन्दसन्दोहप्रफुल्लितमुखाम्बुजाः ॥ ६३ ॥

दृष्ट्वा नारायणं देवं वरं लब्ध्वा मनोरमम् । हरिभक्तिसुखैश्वर्य्यं परं लब्ध्वामुदं ययुः

अत्र स्नात्वा जलं पीत्वा पूजयित्वा जनार्दनम् ।

इह लोके सुखं भुक्त्वा यात्यन्ते परमं पदम् ॥ ६५ ॥

अत्रपुण्यवतां ज्योतिर्दृश्यते जलमध्यतः । यद्दृष्ट्वा न पुनर्भूयो गर्भवासं प्रपद्यते ॥
येऽशुद्धपितृजाः पापाः पाषण्डमतिवृत्तयः । न तेषांशिरसिप्रायःपतन्त्यापःकदाचन
दिनत्रयं शुचिर्भूत्वा पूजयित्वा जनार्दनम् ।
उपोष्य भगवद्भक्त्यासिद्धान्पश्यन्ति साधवः ॥ ६८ ॥
ये तत्र चपलास्तथ्यं न वदन्ति च लोलुपाः । परिहासपरद्रव्यपरस्त्रीकपटाग्रहाः
मलचैलावृताऽशान्ताऽशुचयस्त्यक्तसत्क्रियाः । तेषांमलिनचित्तानांफलमत्रनजायते
ये तत्र साधकाः शान्ताविरलाविधिवर्त्मगाः । तेषांजपस्तपोहोमोदानव्रतजपक्रियाः
क्रियमाणा यथाशक्त्या ह्यक्षय्यफलदायकाः ॥ ७२ ॥
यत्किञ्चिच्छुभकर्माणि क्रियमाणानि देहिनाम् । महदादिफलंदद्युर्निःश्रेयसमत्तनुमम्
श्रावणीयमिह किं फलाधिकं यत्र यान्ति विबुधाः फलार्थिनः ।
पूजितादनु हरेः प्रियार्थिनः स्वर्गमार्गनिरताः प्रमोदिनः ॥ ७४ ॥
यत्र सन्ति न च विघ्नकारिणः कर्मणां हरिभयात्सुसिध्यति ।
निर्विशन्ति च फलं विवेकिनः कर्ममार्गनिरताः सुदेहिनः ॥ ७५ ॥
ये पठन्त्यथ च पाठयन्त्यहो पुण्यतीर्थविषयं प्रकाशितम् ।
भक्तिभावसमलंकृताश्च ते सम्प्रयान्ति हरिमन्दिरं शुभम् ॥ ७६ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे
बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसम्वादे वसुधारातीर्थमाहात्म्य-
वर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः

पञ्चधारादितीर्थमाहात्म्यवर्णनम्

शिव उवाच

ततो नैर्ऋत्यदिग्भागे पञ्चधाराः पतन्त्यधः । प्रभासं पुष्करं चैव गयां नैमिषमेव च
कुरुक्षेत्रं विजानीहि द्रवरूपं षडानन !॥ १ ॥
पुरा ते ब्रह्मणः स्थानं गता मलिनरूपिणः । पापिनां पापदोषेण विकृताः कृतबुद्धयः
तत्र गत्वा नमस्कृत्य ब्रह्माणं लोकभावनम् । ऊचुः प्राञ्जलयः सर्वे निजागमनकारणम्
तच्छ्रुत्वा ध्यानमालम्ब्य प्रहस्य जगदीश्वरः ।
उवाच वचनं चारु स्मृत्वा बदरिकाश्रमम् ॥ ४
मा भैष्ट गच्छत क्षिप्रंहरेर्बदरिकाश्रमम् । यस्य निर्वेशमात्रेणसद्यः पुण्यम्भविष्यति
ततस्ते हर्षवेगेन नमस्कृत्य पितामहम् । जग्मुरुत्फुल्लनयना विशालाममितप्रभाम् ॥
यस्य निर्वेशमात्रेणतत्क्षणाद्विगतैनसः । ततोद्विरूपमास्थायस्वस्थानं ययुरुत्सुकाः
द्रवरूपेणचान्येनपञ्चतिष्ठन्तिनिर्मलाः । तेषु स्नात्वाविधानेन कृत्वानित्यक्रियांशुचिः
तत्तत्तीर्थफलं लब्ध्वा यात्यन्ते परमं पदम् । पञ्चोपवासनिरतः पूजयित्वाजनार्द्दनम्
इह भोगान्बहून्भुक्त्वा हरेःसालोक्यमाप्नुयात् ॥ १० ॥
ततस्तु विमलं तीर्थं सोमकुण्डाभिधंपरम् । तपश्चकार भगवान्सोमोयत्रकलानिधिः

स्कन्द उवाच

सोमकुण्डस्य माहात्म्यंवदसे वदतांवर !। त्वत्प्रसादादहं श्रोतुमिच्छामि परमेश्वर!

शिव उवाच

पुरा त्रिनयनः श्रीमान्सोमः सम्प्राप्य यौवनम् ।
श्रुत्वा स्वर्वासिनां सौख्यं गन्धर्वेभ्यो मुहुर्मुहुः ॥
तदा स्वपितरं प्रायात्प्रष्टुं तल्लभते कथम् ॥ १३ ॥

सोम उवाच

भगवन्सर्वधर्मज्ञ! करुणामृतसागर !। कथं वा लभ्यते स्वर्गः सर्वेषामुत्तमोत्तमः ॥
ग्रहनक्षत्रताराणामोषधीनां पतिः प्रभो !। स्यामहं येन तं यत्नं कृपया वद मे पितः!॥

अत्रिरुवाच

तपसाऽऽराध्य गोविन्दंयमैर्वानियमैः सुत !। किं दुर्ल्लभंतु साधूनामिहलोकेपरत्र च
ततस्तु नारदाच्छ्रुत्वा क्षेत्रं परमनिर्मलम् । जगाम बदरीं नत्वा पितरं दिशमुत्तराम् ॥
तत्र गत्वाफलैर्मेध्यैर्विष्णोः पूजामकल्पयत् । जजाप परमं जाप्यमष्टाक्षरं मनोहरम्
अष्टाशीति सहस्राणि वर्षाणि भगवत्परम् । तपस्तेपेऽतिपरमं सर्वलोकभयावहम् ॥
ततस्तुष्टः समागत्य भगवान्भक्तवत्सलः । उवाच सोमं विधिवद्वरं वरय सुव्रत !॥
ततः सोमः समुत्थाय नमस्कृत्य पुनः पुनः । ग्रहनक्षत्रताराणामोषधीनामहं पतिः ॥
द्विजानामपि सर्वेषां भूयासं ते प्रसादतः ॥ २१ ॥

हरिरुवाच

वरमन्यं वृणुष्वाऽतो दुर्ल्लभंत्वं भवादृशाम् । वरान्नोवरयामासतदा तं हिमजात्मज!
ततोऽतिविमनाः सोमः पुनस्तेपे तपो महत् । त्रिंशद्वर्षसहस्राणि देवमानेन पुत्रक!॥
तदाऽसौ करुणापूर्णहृदयो भगवानगात् । वरं वरय भद्रन्ते वरदोऽहं तवाऽग्रतः ॥
सोमस्तु तादृशं वव्रे तच्छ्रुत्वाऽन्तर्दधे हरिः ॥ २४ ॥
ततोऽतिविमनाःसोमःपुनःस्तेपेतपोमहत् । चत्वारिंशत्सहस्राणितपस्तप्तं सुदुष्करम्
ततस्तुष्टो हरिःसाक्षाच्छङ्खचक्रगदाधरः । उवाचवचनश्चारु सोमं श्रान्तं तपोनिधिम्
उत्तिष्ठोत्तिष्ठभद्रन्ते वरम्वरय सुव्रत । तपसाऽऽराधितो नूनंत्वयाऽहं तपसां निधिः

सोम उवाच

यदि तुष्टो भवान्मह्यं भगवान्वरदर्षभः । ग्रहनक्षत्रताराणामाधिपत्यं प्रयच्छ मे ॥
तथौषधीनाम्विप्राणां यामिन्याश्च जगत्पते !॥ २८ ॥

श्रीभगवानुवाच

दुर्ल्लभम्प्रार्थितंवत्स वितरामितथाप्यहम् । एवमस्तु ततःसर्वे समागत्य दिवौकसः

अभिषिक्तवन्तो विधिवत्सोमं राजानमादृताः ॥ २९ ॥
ततोविमानमारूढो रथेन शुभ्रवाससा । अभिष्टुतः सुरैरभूद्दिवङ्गतो निशाकरः ॥३०
ततः प्रभृतितीर्थंतत्सोमकुण्डेतिदुर्ल्लभम् । यद्दृष्टिमात्रान्मनुजा गतदोषाभवन्तिहि
यदुस्पर्शनाद्यान्तिसोमलोकंविनिन्दिताः । यत्र स्नात्वाविधानेन सन्तर्प्य पितृदेवताः
सोमलोकंविनिर्भिद्य विष्णुलोकम्प्रपद्यते । उपवासत्रयं कृत्वा पूजयित्वाजनार्द्दनम्
न तेषां पुनरावृत्तिःकल्पकोटिशतैरपि । त्रिरात्रेणस्थितोभूत्वा पूजयित्वाजनार्द्दनम्
जपं कुर्वन्विशेषेण मन्त्रसिद्धिः प्रजायते । कर्मणा मनसावाचा यत्कृतंपातकं नृभिः
तत्सर्वं क्षयमायाति सोमकुण्डेक्षणादिह । ततस्तु द्वादशादित्यतीर्थम्पापहरम्परम् ॥
यत्र तप्त्वापुनकृच्छ्रंकाश्यपःसूर्यतांययौ । दुर्ल्लभंत्रिषु लोकेषुतपःसिद्ध्यैककारणम्
रविवारेषुसप्तम्यांसङ्क्रान्त्यांविधिवन्नरः। सप्तजन्मकृतात्पापात्स्नानमात्रेणशुद्ध्यति
पाराकंविधिवत्कृत्वा पूजनीयोजनार्द्दनः । सूर्यलोके सुखम्भुक्त्वा विष्णुलोकेमहीयते
महारोगाभिभूतस्तु स्नात्वा पीत्वा जलं शुचिः ।
रोगमुक्तोऽचिरादेव नाऽत्र कार्या विचारणा ॥ ३९ ॥
चतुःस्रोतं परं तीर्थं विलोचनमनोहरम् । धर्मार्थकाममोक्षास्ते तिष्ठन्ति द्रवरूपिणः
हरेराज्ञाऽनुसारेण क्षेत्रेऽस्मिन्वैष्णवे स्वयम् । पुरुषार्थाद्रवीभूताभूतानां मुक्तिहेतवः
पूर्वादिदिक्षु क्रमसन्निविष्टा धर्मप्रधाना इव रूपभाजः ।
भजन्ति ये तान्क्रमसन्निविष्टान्प्रसन्नतेषां सततं भवेद्धि ॥ ४२ ॥
नाऽन्यत्र क्षेत्रे मिलिताः कथञ्चिच्चत्वार एते त्रिदशैरलभ्याः ।
तानग्रिमं जन्म जवेन लब्ध्वा पश्यन्ति पूर्वार्जितपुण्यपुञ्जाः ॥ ४३ ॥
ये दुर्जना दुर्जनसङ्गभाजः क्षमार्जवप्राणजयप्रधानाः ।
क्रीडामृगा ग्राम्यवधूजनानां न ते प्रपश्यन्त्यचिरात्पुमर्थान् ॥ ४४ ॥
तथैव पश्यन्त्यचिरेण तत्त्वज्ञानैकहेतूनपि तान्पुमर्थान् ॥ ४५ ॥
यत्र ब्रह्मादयो देवा ऋषयश्च तपोधनाः । पर्वणि प्रयताः स्नातुं समायान्ति षडानन!॥
ततः सत्यपदंनाम तीर्थं सर्वमनोहरम् । त्रिकोणाकारमेवैतत्कुण्डं कल्मषनाशनम् ॥

एकादश्यां हरिस्तत्र स्वयमायाति पावने ॥ ४९ ॥

तत्पश्चादृषयः सर्वे मुनयश्च तपोधनाः । स्नातुमायान्ति विधिवत्कुण्डे सत्यपदाभिधे
गन्धर्वाप्सरसां यत्र मध्याह्ने हरिवासरे । गानं श्रृण्वन्ति विरलाःसत्यव्रतपरायणाः
दर्शनादस्य तीर्थस्य पातकानि महान्त्यपि । पलायन्ते भयेनैव सिंहं दृष्ट्वा मृगा इव

स्वशाखोक्तविधानेन स्नानं कृत्वा विचक्षणः ।
सत्यलोकमवाप्नोति ततो नैःश्रेयसम्पदम् ॥ ५१ ॥
अहोरात्रं शुचिर्भूत्वा उपोष्य च जनार्द्दनम् ।
पूजयित्वा यथाशक्त्या स जीवन्मुक्तिभाजनः ५२ ॥
ब्रह्माविष्णुश्च रुद्रश्चत्रिकोणस्थाःसमाहिताः ।
तपः कुर्वन्त्यनुदिनं सर्वलोकादितोषणम् ॥ ५३ ॥

त्रिकोणमण्डितं तीर्थं नाम्ना सत्यपदप्रदम् । दर्शनीयं प्रयत्नेन सर्वपापमुमुक्षुभिः ॥
जपंतपो हरिस्तोत्रंपूजांस्तुत्यभिवन्दनम् । माहात्म्यंकुर्वतांवक्तुं ब्रह्मणाऽपिनशक्यते
ततोऽतिविमलं नाम नरनारायणाश्रमम् । द्विविधं दृश्यते तत्र पाथः परमनिर्मलम्॥
उभाभ्यामुभयोःप्रीतिर्भवतीतिविनिश्चितम् । तत्रस्नात्वाप्रयत्नेनपूजयित्वाजनार्द्दनम्

सर्वपापविनिर्मुक्तस्तत्क्षणान्नाऽत्र संशयः ॥ ५७ ॥

ततो नारायणावासशिखरे विमलाकृति । तीर्थं पवित्रमुर्वश्या अभिव्यक्तिकरम्भवेत्

स्कन्द उवाच

अभिव्यक्तिः कथं तस्या उर्वश्याः शिखरे पितः ! ।
किम्पुण्यं किम्फलं तत्र परं कौतूहलम्वद ॥ ५९ ॥

शिव उवाच

धर्मस्य पत्नीमूर्त्यासीत्तस्यां जातौ षडानन ! । नरनारायणौ साक्षाद्भगवानेव केवलम्
पित्रोराज्ञामनुप्राप्यतपोऽर्थं कृतमानसौ । उभयोर्नगयोस्तौ तु तपोमूर्तींइव स्थितौ
तौदृष्ट्वाविस्मितःशक्रःप्रेषयामासमन्मथम् । सगणंतपसोध्वंसो यथास्याद्गन्धमादनम्
विक्रम्यविधिवत्ते तु नारायणवलोदयम् । ज्ञात्वा हतमनस्कास्तानुवाच जगतीपतिः

हरिरुवाच

किमर्थमागता यूयमातिथ्यं गृह्यतामिति ॥ ६४ ॥

इत्युक्त्वाफलमूलानितेभ्योदत्त्वोर्वशींतथा । दत्त्वान्तर्धिमगादेवपश्यतांविघ्नकारिणाम्
ते तु गत्वा दिवं भीता शक्रायोचुर्वलं हरेः । शक्रस्तामुर्वशींप्राप्यहर्षणैकयुतोऽभवत्
ततः प्रभृति तत्तीर्थमुर्वशी नामतः पृथक् । प्रसिद्धं यत्र भगवान्स्वयमास्ते तपोमयः
तत्र स्नात्वा विधानेन उपोष्यरजनिद्वयम् । पूजयित्वाहरिस्तत्र नरोनारायणोभवेत्
उर्वशीकुण्डमासाद्य कामनावशतो नरः । उर्वशीलोकमाप्नोति स्नानमात्रेण पुत्रक !॥
सदैव भगवांस्तत्र उर्वशीकुण्डसन्निधौ । भूतानांभावयन्भव्यं तपोमूर्तिर्व्यवस्थितः

आमोदं तदुपरि वै प्रभञ्जनोऽपि श्रीभर्तुर्वहति पदाम्बुजैकलब्धम् ।
यत्सङ्गात्कलियुगकल्मषातुराणामुत्सङ्गे न भवति पापभारपाकः ॥ ७१ ॥
यत्सङ्गाद्धर्षमुपावहत्पदश्रीनिर्विण्णो गिरिविवरेच्युतैकसेवी ।
श्रीभर्तुश्चरणयुगं वहन्समन्तादभ्येति प्रशममहस्तपः समीरे ॥ ७२ ॥
गीर्वाणानुपहसति स्वधेन पूर्णः कीटोऽपि प्रशमितदुर्नयो निरीहः ।
यत्रस्थः कुसुमनिवेदमात्मयोगपर्युष्टं जहदुपयास्यते पदं तत् ॥ ७३ ॥
यत्रेत्वा मुनिमतयो वहिः पदार्थाश्चापश्यन्निहितपदाम्बुजैकभाजः ।
यत्रस्थः स्वयमपि गोपतिर्जनानामाधत्तेस्वपदमनुक्रमागतानाम् ॥ ७४ ॥

वहूनि सन्ति तीर्थानि गिरौ नारायणाश्रिते । सर्वपापहराण्याशु तान्यहं वेदनोजनः
संसारकुहरे घोरे यत्र स्थगितमात्मनः । उर्वशीकुण्डमासाद्य दिनमेकंवसेन्नरः ॥७६॥
उर्वशीदक्षिणे भागे आयुधानि जगत्पतेः । विद्यन्ते दर्शनात्तेषां न शस्त्रभयभाग्भवेत्
य इदं श्रृणुयाद्भक्त्या श्रावयेद्वा समाहितः । सर्वपापविनिर्मुक्तः सालोक्यं लभते हरेः

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णव-
खण्डे बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसम्वादे पञ्चधारादितीर्थ-
माहात्म्यवर्णनं नाम सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

मेरुसंस्थापनतीर्थादिधर्मक्षेत्रादिविविधतीर्थान्तमहत्त्ववर्णनम्

शिव उवाच

ब्रह्मकुण्डाद्दक्षिणतो नरावासगिरिर्महान् । यत्र भगवता मेरुः स्थापितो लोकसुन्दरः

स्कन्द उवाच

कथं भगवता मेरुः स्थापितो नरसन्निधौ । महत्कौतूहलं तात! कथ्यतां यदि रोचते

महादेव उवाच

यदा भगवतो वासो विशालायां समागतः । देवा महर्षयः सिद्धाःसविद्याधरचारणाः
विहाय मेरुशृङ्गाणि भगवद्दर्शनोत्सुकाः । भगवद्दर्शनाह्लादतिरस्कृतसुरालयाः ॥ ४ ॥
तदा तु भगवांस्तेषां सुखहेतोः षडानन ! । उत्पाट्यमेरुशृङ्गाणि करेणैकेन लीलया
स्थापयामास सर्वेषां भगवान्प्रीतिवर्द्धनः ॥ ५ ॥
ततः सर्वे समालोक्यगिरिं काञ्चननिर्मितम् । प्रसन्नास्तुष्टुवुः सर्वेनारायणमनामयम्

देवा ऊचुः

योऽस्मत्सुखाय भवविभ्रमणाय बिभ्रल्लीलातनूःकनकशैलमिहाऽऽनिनाय।
जेता सुरार्द्दनशतं त्रिदशैकपक्षस्तस्मै विधेम नम उग्रतपःश्रियाय ॥ ७ ॥
यद्यत्करोति कृपया कृपणार्तितूलशैलाग्निराश्रितकृदेकविदाम्वरिष्ठः ।
स्वेनैव तेन करणेन स तुष्यतां नो यस्याऽन्वकारि पुरुषेण न केनचिद्धि ॥
अस्माकमुन्नतधियां विदधाति सम्यक्छिक्षां पितेव करुणो निजलाभपूर्णः ।
त्रैलोक्य रक्षणविचक्षणदृष्टिपातपूर्णामृताम्बुधिरसो विपदः प्रपायात् ॥ ६

ऋषय ऊचुः

येनाऽध्यस्तं भाति समस्तं जगदेकं क्रीडाभाण्डं सत्यतयाऽजस्यविभूम्नः
भानां वृन्दं यद्वदनेप्याश्रितमूर्तिस्तस्मै नित्यं शाश्वत! तुभ्यं प्रणमाम॥१०

सिद्धा ऊचुः

यत्कृपालवत एव महान्तः सिद्धिमीयुरितरे भवभाजः ।
तेऽचिरेण भवभीमपयोधिं तीर्णवन्त इति नः सुमनीषा ॥ ११ ॥

विद्याधरा ऊचुः

विभो! सद्गुणग्राम! कल्याणमूर्ते !परेशान सम्मानसन्तानहेतो !।
भवत्पादपद्मासवस्वादमत्ताः कृतार्था न चित्रं भवत्यत्र किञ्चित् ॥ १२ ॥
ततस्तुष्टोऽथभगवांस्तेषामासीद्दिवौकसाम् । वरंवृणुध्वमित्युक्तास्तेप्रोचुर्वरदर्षभम्
परितुष्टो भवान्साक्षाद्देवदेवो रमापतिः । बदरी न त्वया त्याज्या न च मेरुः कदाचन
मेरुशृङ्गं प्रपश्यन्ति येजनाःपुण्यभागिनः । तेषांवैत्वत्प्रसादेनमेरौवासःप्रजायताम्
तत्र भुक्त्वा चिराद्भोगान्भूयादन्ते लयस्त्वयि ।
एवमस्त्विति चाऽऽभाष्य तत्रैवाऽन्तर्हितो हरिः ॥ १६ ॥
ततः प्रभृति ते सर्वे मेरुशृङ्गविहारिणः । नरनारायणस्याऽन्ते पाल्यमाना मुहुर्मुहुः ॥
कदाचिद्दिवि तिष्ठन्ति कदाचिन्मेरुमध्यतः । निर्विशङ्का निरुद्वेगा ऋषयश्चतपोधनाः
भगवानपि तत्रैव नररूपेण तिष्ठति । धनुर्बाणधरः श्रीमांस्तपसा पावकोपमः ॥
आनन्दमृषिवृन्दस्य जनयंस्तप आस्थितः ॥१६ ॥
ततस्तु परमंतीर्थंलोकपालाभिवन्दितम् । यत्रसंस्थापयामासलोकपालान्हरिःस्वयम्

स्कन्द उवाच

कथं भगवता तत्र लोकपालाश्च स्थापिताः । महत्कौतूहलं तात कथयस्व महामते

शिव उवाच

एकदा मेरुमध्यस्थाश्रयानिह हरन्हरिः । देवानामृषिमुख्यानां चरितं द्रष्टुमुद्यतः ॥
तं दृष्ट्वा सहसोत्थाय नमस्कृत्य दिवौकसः । ऊचुस्ते विनयात्सर्वेप्रसीदभगवन्विभो
क्षणं विश्राम्यविधिवद्दृष्ट्वातांविरलांभुवम् । सान्निध्यमृषिदेवानामयुक्तंभावयन्मिथः
ततः प्रहस्य भगवानुवाच मधुसूदनः । लोकपालान्समाहूय नाऽत्र स्थेयं भवद्भिः
ऋषयस्तापसाःसिद्धासस्त्रीकानिवसन्ति हि । भवद्भिर्नानामास्थानंपुरैवकल्पितंमया

ततःस त्वरितो गत्वा रम्ये गिरिवरेहरिः । लोकपालान्समाहूयस्थापयामासतान्गुह!
तत्रैव शैलदण्डेन हत्वाद्रिंजलकाङ्क्षया । क्रीडापुष्करणीं तेषां निर्ममे सुमनोहराम्॥

सस्त्रीका यत्र गीर्वाणा विचरन्ति निजेच्छया ।
गायन्ति स्वनुमोदन्ति गन्धर्वास्त्रिदिवौकसाम् ॥ २६ ॥

वनानि कुसुमामोदरम्याणि परिपोषतः । दिनानियत्रगच्छन्ति क्षणप्रायाणिदेहिनाम्
भगवानपि तत्रैव तेषामानन्दमावहन् । द्वादश्यां पौर्णमास्याञ्च स्वयमायातिमज्जने
तत्पश्चादृषयः सर्वे मुनयश्च तपोधनाः । यत्रस्नात्वा विधानेन गुह! मध्याह्नकालतः ॥

असङ्गं परमं ज्योतिर्जले पश्यन्ति चक्षुषा ॥ ३२ ॥

सर्वतीर्थावगाहेन यत्फलम्परिकीर्तितम् । तत्फलंतत्क्षणादेव दण्डपुष्करिणीक्षणात्
यत्र काम्यानिकर्माणिसफलानिमनीषिणाम् । यत्रपिण्डप्रदानेनगयातोऽष्टगुणंफलम्
यज्ञो दानं तपः कर्म सर्वमक्षयमुच्यते । द्वादश्यां शुक्लपक्षस्य ज्येष्ठे मासि षडानन!॥
तत्र स्नात्वा विधानेन कृतकृत्यो भवेद्यतः । बदरीतीर्थमध्ये तु गुप्तमेतत्सुरोत्तमैः ॥

न वाच्यं यत्र कुत्राऽपि तव प्रीत्या मयोदितम् ॥ ३६ ॥

वक्तव्यं किमिह बहुप्रभूतपुण्याः पश्यन्ति प्रथितमिदं सुरैकगुप्तम् ।
नाऽन्येषां कथमपि चेतसि प्रसङ्गाद्दैवैः स्यादनुदिनचिन्तितं गुहैतत् ॥ ३७ ॥
येषाम्वै भगवति चेत्समग्रकर्मस्वाध्यायाभ्यसनविधिक्रमेण जातम् ।
पश्यन्ति त्रिभुवनदुर्ल्लभं सुतीर्थं दण्डोदं न भवति चाऽन्यथा सुदृष्टम् ॥ ३८ ॥

दण्डोदकात्परं तीर्थं न विष्णोः सदृशोऽमरः । विशालासदृशं क्षेत्रं नभूतंनभविष्यति
सेवनीया प्रयत्नेन विशाला च विचक्षणैः । य इच्छेत्सततं धाम भगवत्पार्श्ववर्ति वै

स्कन्द उवाच

गङ्गामाश्रित्य तीर्थानिकानि सन्तीहसत्पदे । श्रेयस्कराणिभूरीणिसंक्षेपात्तानिमेवद

महादेव उवाच

गङ्गायां यत्र संयोगो मानसोद्भेदसन्निधौ । तत्तीर्थं विमलं पुण्यं प्रयागादधिकं महत्
त्रिंशद्वर्षसहस्राणि वायुभोजनतो भवेत् । तत्फलं स्नानमात्रेण गङ्गायाः सङ्गमेनृणाम्

सङ्गमाद्दक्षिणे भागे धर्मक्षेत्रं प्रकीर्तितम् । यत्र मूर्त्यां श्रुतौ जातौ नरनारायणावृषी
तत्क्षेत्रं पावनं मर्त्ये सर्वेषामुत्तमोत्तमम् । धर्मस्तत्रैव भगवांश्चतुष्पादवतिष्ठति ॥४५
यत्रयज्ञास्तपोदानंयत्किञ्चित्क्रियतेनृभिः । तत्पुण्यस्यक्षयोनास्तिकल्पकोटिशतैरपि
ततो दक्षिणदिग्भाग उर्वशीसङ्गमाभिधम् । सर्वपापहरं पुंसां स्नानमात्रेण देहिनाम्
कूर्मोद्धारस्ततः साक्षाद्धरिभक्त्यैकसाधनम् । स्नानमात्रेणभूतानां सत्त्वशुद्धिः प्रजायते
ब्रह्मावर्त्तस्ततः साक्षाद्‌ब्रह्मलोकैककारणम् । दर्शनादेव तीर्थस्य सर्वपापक्षयो भवेत् ॥
बहूनि सन्ति तीर्थानिदुर्गम्यानीहदेहिनाम् । संक्षेपात्कथितं वत्स! तवादरवशादिदम्
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः । सर्वपापविनिर्मुक्तः पदं विष्णोः प्रपद्यते ॥

राजा विजयमाप्नोति सुतार्थी लभते सुतम् ।
कन्यार्थी लभते कन्यां कन्या विन्दति सत्पतिम् ॥ ५२ ॥
धनार्थी धनमाप्नोति सर्वकामैकसाधनम् ॥ ५३ ॥

मासमात्रं नरो भक्त्या शृणुयाद्यःसमाहितः । तस्याऽभीष्टसमावाप्तिर्दुर्लभाऽपि नसंशयः

आधिव्याधिभयं घोरं दारिद्र्यं कलहं तथा ।
यस्य गेहेषु माहात्म्यं तत्रैतानि न कर्हिचित् ॥ ५५ ॥

नाऽपमृत्युर्न सर्पादि दौर्भाग्यञ्चापि वर्तते । दुःस्वप्नग्रहपीडा च परराष्ट्रभयं तथा
युद्धे यात्राप्रयागे च पठनीयं प्रयत्नतः । विवाहे च विवादे च शुभकर्मणि यत्नतः ॥

पूर्णम्वाऽध्यायमात्रम्वा तदर्धम्वा विचक्षणैः ।
सर्वकार्यप्रसिद्धिः स्यान्नाऽत्र कार्या विचारणा ॥ ५८ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे
बदरिकाश्रममाहात्म्ये शिवकार्त्तिकेयसम्वादे बदरिकाश्रमे मेरुसंस्था
पनतीर्थलोकपालतीर्थदण्डपुष्करिणीतीर्थधर्मक्षेत्रादिविविध-
तीर्थक्षेत्रमाहात्म्यवर्णनंनामाऽष्टमोऽध्यायः ॥ ८ ॥

इति श्रीस्कान्दे द्वितीये वैष्णवखण्डे तृतीयं बदरिकाश्रममाहात्म्यं समाप्तम् ॥२-३॥

—:०:—